# प्रतिस्पन्दः

( त्रयोदशे संस्कृतनाट्यमहोत्सवे प्रस्तुतानां प्रहसनानां समीक्षाः )




राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
नवदेहली

| | |
|---|---|
| मुख्यपरामर्शक: | प्रबन्धपरामर्शक: |
| **प्रो. परमेश्वरनारायणशास्त्री** | **प्रो. एस्. सुब्रह्मण्यशर्मा** |
| कुलपति: | कुलसचिव: (प्र.) |
| सम्पादक: | सहसम्पादक: |
| **प्रो. रमाकान्तपाण्डेय:** | **डॉ. आर.जी. मुरलीकृष्ण:** |

## चतुर्दशे संस्कृतनाट्यमहोत्सवे प्रदर्शनीयरूपकाणि

### २७.०२.२०१७ (सोमवासर:)

| | | |
|---|---|---|
| छत्रपतिसाम्राज्यम् (१-५ अङ्का:) | वेदव्यासपरिसर:, बलाहर: | अपराह्ने २.०० त: ३.०० वादनं यावत् |
| छत्रपतिसाम्राज्यम् (६-१० अङ्का:) | श्रीरणवीरपरिसर:, जम्मू | अपराह्ने ३.३० त: ४.३० वादनं यावत् |
| पण्डितराजीयम् | श्रीराजीवगान्धीपरिसर:, शृङ्गेरी | सायं ५.०० त: ६.०० वादनं यावत् |

### २८.०२.२०१७ (मङ्गलवासर:)

| | | |
|---|---|---|
| अङ्गुष्ठदानम् | एकलव्यपरिसर:, अगरतला | प्रात: १०.३० त: ११.३० वादनं यावत् |
| लीलाभोजराजम् | गङ्गानाथझापरिसर:, इलाहाबाद | मध्याह्ने १२.०० त: १.०० वादनं यावत् |
| दाम्पत्यकलहम् | श्रीरघुनाथकीर्तिपरिसर:, देवप्रयाग: | अपराह्ने २.०० त: ३.०० वादनं यावत् |
| रक्षाबन्धनम् | श्रीसदाशिवपरिसर:, पुरी | अपराह्ने ३.३० त: ४.३० वादनं यावत् |
| मदनमोहनमालवीय-कीर्तिमञ्जरीनाटकम् | लखनऊपरिसर:, लखनऊ | अपराह्ने ५.०० त: ६.०० वादनं यावत् |
| संयोगितास्वयंवरम् | गुरुवायूरपरिसर:, तृश्शूर | अपराह्ने ६.३० त: ७.३० वादनं यावत् |

### ०१.०३.२०१७ (बुधवासर:)

| | | |
|---|---|---|
| प्रतापविजयम् | जयपुरपरिसर:, जयपुरम् | प्रात: १०.३० त: ११.३० वादनं यावत् |
| स्नेहसौवीरम् | क.जे. सोमैय्या संस्कृत विद्यापीठम्, मुम्बई | प्रात: १२.०० त: १.०० वादनं यावत् |
| तण्डुलप्रस्थीयम् | भोपालपरिसर:, भोपालम् | मध्याह्ने २.०० त: ३.०० वादनं यावत् |

# पुरोवाक्



संस्कृतभाषायाः शास्त्रपरम्पराणां च संरक्षणाय प्रचाराय प्रसाराय च राष्ट्रियसंस्कृतसंस्थानं राष्ट्रियस्तरे अन्ताराष्ट्रियस्तरे च बहुविधान् कार्यक्रमान् समायोजयति प्रतिवर्षम्। तेषु पूर्वं वसन्तोत्सवनाम्ना अनन्तरं कौमुदीमहोत्सवनाम्ना सम्प्रति च संस्कृतनाट्यमहोत्सवनाम्ना विश्रुतिं गतोऽन्तःपरिसरीय-नाट्यस्पर्द्धात्मकोऽयं कार्यक्रमः महाँल्लोकप्रियः समजनि। राष्ट्रियसंस्कृतसंस्थानस्य प्रथम-कुलपतिपदभाग्भिः प्राचीनार्वाचीनशास्त्रतत्त्वविचारदक्षैः श्रीमद्भिः वेम्पटिकुटुम्बशास्त्रिमहोदयैः 2004 तमे खीष्टाब्दे छात्रेष्वभिनवकौशलाभिवृद्धये प्रारब्धोऽयं नाट्यमहोत्सवः विश्वस्मिन्नपि जगति स्वसदृशोऽन्यतमो नाट्यप्रयोगोपक्रमः। अस्मिन् कार्यक्रमे संस्थानस्य विविधपरिसरीया अनूचानाः तत्तद्देशप्रदेशसंस्कृतिप्रभावभाविता भास-कालिदास-शूद्रक-विशाखदत्त-मुरारिप्रभृति-प्रसिद्धप्राचीननाट्यकृतां नाट्यकृतीनां मञ्चनेन सहृदयसमाजं रसे न्यमज्जयन्। नाटक-प्रकरण-प्रहसनादीनां मञ्चनपरम्परेयम् ऐषमः 150 तमं रूपकमभिनेष्यतीति हर्षप्रकर्षं परिचुम्बति संस्कृतानुरागिणां नो मनः।

त्रयोदशसंस्कृतनाट्यमहोत्सवावसरे छात्रेषु अभिनयपाटवस्य उत्तरोत्तरं विकासाय भारतभूविख्यातानां नाट्यतत्त्वविदां काचित् समीक्षासमितिः सन्दृब्धा। सा च समितिः नीरक्षीरविवेकपुरस्सरं प्रतिनाटकं स्वाभिमतं प्रस्तुतवतीति तेषामभिमतमेवेह 'प्रतिस्पन्द' इति नाम्ना प्रकाश्यते। प्रतिस्पन्दमिमं पठित्वा अस्मच्छात्राः स्वीयप्रयोगकौशलारविन्दं विकचीकरिष्यन्तीति मे द्रढीयान् विश्वासः।

**( प्रो. परमेश्वरनारायणशास्त्री )**
कुलपतिः

---

# नैवेद्यम्



संस्कृतं नाम भारतराष्ट्रस्य ऋषिप्रदत्तं रिक्थम्। अत्र आयुर्वेदो नाट्यवेदः सङ्गीतविद्या अर्थशास्त्रं दर्शनानि षडङ्गानि अन्यानि च नैकानि समाजोपयोगीनि शास्त्राणि विलसन्तीति राष्ट्रियसंस्कृतसंस्थानम् एतेषां सर्वेषां परिरक्षणे संरक्षणे सामान्यजनानां कल्याणार्थं प्रचारे प्रसारे च विद्यते बद्धपरिकरम्। अतः संस्थानस्य मान्यकुलपतीनां निर्देशानुसारेण प्रतिवर्षं ये ये कार्यक्रमाः समायोज्यन्ते, तेषु अयं नाट्यमहोत्सवात्मकः कार्यक्रमः सर्वजनसाधारणत्वात् भजते वैशिष्टयम्।

सततपरिस्यन्दमाना नदीव समाजः। समाजे वसन् अनुदिनं नूतनाम् अनुभूतिं लभते मानवः। अम्भः यथा तरङ्गोद्बुदादिरूपान्तरं प्राप्नोति तथैव अनुभूतिरपि काव्यनाटकादिरूपेण परिस्फुरति। अतः काव्यरूपकादीनि समाजस्य आदर्शः इति कथ्यते। रूपकाणि न केवलां संस्कृतिं अभिव्यञ्जयन्ति किन्तु मानवस्य सूक्ष्मातिसूक्ष्मसंवेदनां प्रतिस्पन्दयन्ति। संवेदनारूपसंस्कारस्य जागरणं स्वात्मानुसंधानञ्च रूपकाणां लक्ष्यं विद्यते। आत्मानुसंधानेन अस्माकम् आचरणे परिवर्तनं, आचरणस्य परिवर्तनेन च समाजस्य उन्नतिः भवति।

समाजस्य प्रोन्नतिं कामयमानेन राष्ट्रियसंस्कृतसंस्थानेन राष्ट्रस्तरे अन्तःपरिसरीयस्पर्धात्मकः नाट्यमहोत्सवः प्रतिवत्सरं समायोज्यते। छात्रकौशलसंवर्धनात्मकः अयं नाट्यमहोत्सवः ऐषमः पञ्चाशदधिकैकशतपदं विन्यस्यतीति महतः हर्षस्य प्रकर्षः। छात्राणाम् अभिनयपाटवाभिवर्धनाय परिष्काराय च माननीयकुलपतिभिः आरचिता विदुषां समितिः प्रतिनाटकं छात्राणामभिनयादिकं सूक्ष्मातिसूक्ष्मं परिशील्य स्वाभिप्रायं प्रास्तौत्। तेषाम् अभिप्राय एव "प्रतिस्पन्दः" इति नाम्ना पुस्तककलेवरं समाप्नोतीति महतः प्रमोदस्य अवसरः।

अस्य प्रतिस्पन्दस्य अवलोकनेन छात्रेषु परिष्कारबुद्धिः जागृयादिति आशास्महे।

**( प्रो. एस्. सुब्रह्मण्यशर्मा )**
कुलसचिवः

# सम्पादकीयम्



संस्कृतभाषायाः साहित्यस्य शास्त्रपरम्पराणां च सर्वतोभावेन विकासार्थं भारतसर्वकारेण राष्ट्रियसंस्कृतसंस्थानं प्रत्यष्ठापि। अनेकोपक्रमप्रक्रमैः संस्कृतप्रचाराय समर्पितेन संस्थानेन मानवसंसाधनविकासमन्त्रालयात् सम्प्राप्तभाषामन्दाकिनीतियोजनाप्रवर्तनव्याजेन स्वशिष्यान्तर्निहिताभिनय-प्रतिभापरिष्कारकाम्यया तदानीं कुलपतिपदमलङ्कुर्वतां सहृदयशिरोमणीनां वे. कुटुम्बशास्त्रिणां संरक्षणे 2004 तमे ख्रीष्टाब्दे प्रथमो वसन्तोत्सवः समनुष्ठितोऽभूत्। ततः प्रभृति प्रतिवर्षं देशस्य विभिन्नप्रान्तसंस्थितसंस्थान-परिसरेष्वधीयानाः 'तर्केषु कर्कशधियो वयमेव नान्ये, काव्येषु कोमलधियो वयमेव नान्य' इत्यभियुक्तोक्तिमन्वर्थतां प्रापयन्तोऽस्मच्छात्रकुशीलवा अहमहमिकया शतगुणितोत्साहेन अन्तःपरिसरीयसंस्कृतनाट्य-स्पर्द्धात्मकेऽस्मिन् वसन्तोत्सवनाम्नि नाट्यमञ्चनरूपे शान्ते चाक्षुषे क्रतौ स्वाभिनयपटीयस्त्वं ख्यापयामासुः। पणिक्कर-कमलवासिष्ठ-कमलेशदत्तत्रिपाठि-दोर्बलप्रभाकरशर्म-सोनलमानसिंह-अभिराजराजेन्द्रमिश्र-राधावल्लभत्रिपाठि-एस.आर.लीला-एच.वी.नागराजराव-बलदेवानन्दसागर-इन्द्रमोहनसिंह-विधुखरे-सदृक्षैर्दिगन्तविश्रान्तयशोरथैर्नाट्यतत्त्ववेत्तृभिः समीक्षानिकषारोपिता-भिनयमणयोऽस्मच्छिष्याः भारतीयरङ्ग-महोत्सवादिषु नैकेष्वन्ता-राष्ट्रियनाट्यमञ्चनप्रक्रमेषु भागं गृहीत्वा साफल्यं चावाप्य संस्कृतरचनाधारायाः साम्प्रतिकत्वं सातत्यं सार्वकालिकत्वं च प्रमाणीकृतवन्तः।

आचार्यकुटुम्बशास्त्रिभिः समारब्धेयं नाट्यप्रस्तुतिपरम्परा श्रीमद्भी राधावल्लभत्रिपाठिभिः नवनवाभिः प्रस्तुति-प्रक्रियाभिरपोषि। तैः कुन्दमाला-अविमारक-प्रतिज्ञायौगन्धरायण-महावीरचरित-मालतीमाधव-प्रबुद्धरौहिणेयाद्य-प्रसिद्धनाटकानां प्रस्तुतिः कल्पिता। अभिज्ञानशाकुन्तलस्य प्रस्तुतौ तद्विहिताऽभिनवप्रयोगं स्मारं स्मारमद्यापि रसतरङ्गसम्प्लाविता भवन्ति सहृदयाः। मुख्यालयपक्षतो श्री कू.वेङ्कटेशमूर्तिना यक्षगानविधिना प्रस्तुतानि रूपकचयान् को न स्मरति? को न स्मरति श्री राजीवगान्धीपरिसरेण प्रस्तुते दरिद्रचारुदत्ते वसन्तसेनायाः गुरुवायूरपरिसरस्य भगवदज्जुकीये शिष्यस्य कर्णाश्वत्थामीये अश्वत्थाम्नश्च साक्षादिव सहृदयहृदयसन्निविष्टामभिनयचारुताम्? संस्थानस्य परिसरा देशस्य विभिन्नासु दिक्षु स्थिताः सन्तीति कालिदासकृताया विश्वप्रसिद्ध नाट्यकृते अभिज्ञानशाकुन्तलस्य तत्तदङ्कानां तत्तत्परिसरीयच्छात्रैः कृते मञ्चने यद्वैशिष्ट्यमलक्षि तन्नूनं चकितचकितान् करोत्यद्यापि सहृदयान्। प्रसङ्गेऽस्मिन् पणिक्करमहोदयैः प्रदर्शिते शाकुन्तले श्रीकमलवासिष्ठप्रदर्शिते कुन्दमालानाटके च यो हि प्रभावपरिस्पन्दः परिलक्षितः स न केवलमस्मच्छात्राणाम् अपितु साहित्यजगतः कल्याणाय नवाविष्काराय च कल्पते।

करालेऽपि काले स्वव्यवहारकौशलेन सारल्येन च सच्चिदानन्दपयस्सेकेन परम्परामेनां पौनःपुन्येन उज्जीवयन्तः श्रीमन्तः ए. पि.सच्चिदानन्दमहोदयाः नूनमेवात्र स्मरणीयाः यैः नाटिकानां मञ्चनानुमत्या नवीनः कश्चनाध्यायोऽत्र समायोजि।

किशोरवयःप्रविष्टा सेयं परम्परा संस्थानस्य आचार्येष्वन्यतमानां नवनियुक्तानां कुलपतीनां श्रीपरमेश्वरनारायणशास्त्रिणाम् आशीराशिमवाप्य प्रहसनप्रयोगमिषेण प्रसन्नतया स्वीयं सस्मितं मधुरं हासं व्यतनोत्।

ऐषमः अस्मत्कुशीलवाः संस्कृतरङ्गमञ्चस्यैतिह्ये 150 नाटकानां प्रस्तुतेः कामप्यपूर्वां परां काष्ठां स्प्रक्ष्यन्तीति हर्षनिर्भरमानसः संस्थानपरिवारः प्रभविष्णूनेतान् छात्रीच्छात्रान् स्वाध्यायतपःपूतानपि अभिनयकुशलान् शुभकामनाततिभिरभिषिञ्चति। अस्माद्वर्षात् देवप्रयागस्थः श्रीरघुनाथकीर्तिपरिसरोऽपि नाट्यमहोत्सवे प्रतिभागयात्रामारभते इत्यतः विशेषेण स्वागतार्हः।

पूर्वस्मिन् वर्षे संस्थानस्य कुलपतिभिः छात्राणामभिनयपाटवप्रकर्षाय विदुषां काचित् समीक्षासमितिः निर्धारिता। तया समित्या प्रदत्ताः समीक्षा एव प्रतिस्पन्दनाम्नेह प्रकाश्यन्त इत्येतासामध्ययनेन नूनमेव छात्राणाम् अभिनये अभिनवा काचित् स्फूर्तिः परिस्फुरिष्यतीति दिक्।

**( रमाकान्तपाण्डेयः )**

सम्पादकः

# त्रयोदशसंस्कृतनाट्यमहोत्सवस्य समीक्षा

–एच्.वि. नागराजराव्











अस्मिन् नाट्यमहोत्सवे भागमूढवन्तः सर्वे छात्रा अभिनन्दनार्हाः। सर्वेऽपि प्रामाणिकं, प्रयत्नं परिश्रमं च कृत्वा आगता इत्यत्र न संशयः। अत्र प्रदर्शितानां सर्वेषां प्रहसनानां मार्गदर्शकाः, निर्देशकाः, सङ्गीतकाराश्च प्रशंसनार्हं कार्यं कृतवन्त इति अभिवन्दनार्हाः। संस्कृतरूपकाणि कानिचिद् बहोः कालात् पूर्वं रचितान्यपि समीचीनतया प्रस्तुतानि सहृदयहृदयाह्लादजनने समर्थानीति स्पष्टं साधितं नाट्योत्सवेन।

पूर्वरङ्गो भरतोक्तदिशा भोपालपरिसरेण प्रयोजितश्चेतोहर आसीत्। तत्र नटानां पदविन्यासो लयमनुगतः रसिकमनांस्याकर्षत्। सङ्गीतकं नितान्तं रमणीयम् आसीत्। गायकानां कण्ठश्रीः मानसं ह्लादयति स्म। प्रदर्शयितुं निश्चितानां सर्वेषां रूपकाणां किञ्चित् किञ्चिद् यदायोजनम् अकारि तदपूर्वं सुन्दरं बन्धुरं च। अयं पूर्वरङ्गः प्राचीने काले कथं क्रियते स्म इति ज्ञातवान् निर्देशकः तत्र नौतन्यम् अपि योजितवान्। इदं स्वागतार्हं मन्ये। प्रहसनानां प्रारम्भे प्रदर्शनस्य यानि तन्त्राणि आश्रितानि, तानि चित्ताकर्षणक्षमाण्यासन्। एकैकोऽपि परिसरस्तत्र वैशिष्ट्यं प्रादर्शयत्। प्रेक्षकेषु दिदृक्षा वर्धिता। स्वयं ये नाटकानि च्छात्रैः प्रयियोजयिषन्ति, तेषाम् एतन्नाट्योत्सवदर्शनेन महान् लाभो भवतीति मे मतिः।

प्रायः सर्वैरपि नटैः शुद्धं मधुरं चोच्चारणं कृतम्। किन्तु केचन तत्र हिन्दीभाषोच्चारणमनुसरन्तः अकारान्तपदानां समासमध्यपतितानाम् अन्तिमम् अकारं नोच्चारयन्ति स्म। एष दोषः परिहरणीयः। वेषभूषादिरूपः आहार्याभिनयः समीचीनोऽवर्तत। नाटकात्प्रहसनस्य महान् भेदोऽस्ति आङ्गिकाभिनये। नाटके गम्भीरोऽभिनयः। प्रहसने विकृतः सोऽपेक्षितः। अत्र हासजननस्यैव प्रधानोद्देशत्वात्। प्रहसने पात्राण्येव तादृशानि। मूढाः, मूर्खाः, वञ्चकाः, शठाः, चरित्रहीनाश्च तस्मिन् दृश्यन्ते। अनेकेषु प्रहसनेषु अश्लीलानि वाक्यानि, असभ्यानि सम्भाषणानि च भवन्तीति विदितमेव विदुषाम्। राष्ट्रियसंस्कृतसंस्थानं प्रहसनानां चयने दाक्ष्यं प्रादर्शयदिति महतः प्रमोदस्य स्थानम्।

आदौ प्रदर्शितयोः प्रहसनयोः (लटकमेलक-वञ्चकपञ्चकाख्ययोः) नातीव भेदोऽदृक्ष्यत। तादृशयोः सातत्येन प्रदर्शनं वैरस्यं जनयेदिति भाति। तत्तु पूर्वालोचनया परिहर्तुं शक्यम्।

अस्मिन् नाट्योत्सवे प्रदर्शितेषु प्रहसनेषु सर्वं समीचीनतयाभ्यनायि। शाण्डिल्यादीनां शिष्याणां वेषो भाषा कण्ठध्वनिः चारीति सर्वं हास्यं प्रयोजयति स्म। भगवदज्जुकीये यमदूतस्य हासोऽपि तथा। विवाहविडम्बनाख्ये प्रहसने विधवायाः सम्मार्जनीप्रयोगः हासस्य कारणम् अभवत्। अन्येषु रूपकप्रकारेषु यदतिरेक इति गण्यते तदेव प्रहसने गुणायते। एतत्तत्त्वं सुष्ठु विज्ञाय नटैः प्रहसनानि यशस्वीनि व्यधायिषत। पलाण्डुमण्डने वेदपठने ये स्वरदोषाः कृतास्त एव हास्यरसपरिपोषम् अकुर्वन्। एवं विवाहविडम्बनप्रहसने वृद्धस्य विवाहेच्छोः यन्मुखप्रसाधनम् अतितरां कृतं तदपि प्रेक्षकान् हास्यसागरे न्यमज्जयत्।

प्रहसने न भवन्त्युत्तमानि पात्राणि। अतस्तत्रापहसितम् अतिहसितं च। नटैस्तत्प्रयुक्तम् इति प्रेक्षकाणाम् अपि हासो जातः।

# त्रयोदशसंस्कृतनाट्यमहोत्सवस्य समीक्षा

–एच्.वि. नागराजराव्







अस्मिन् नाट्यमहोत्सवे भागमूढवन्तः सर्वे छात्रा अभिनन्दनार्हाः। सर्वेऽपि प्रामाणिकं, प्रयत्नं परिश्रमं च कृत्वा आगता इत्यत्र न संशयः। अत्र प्रदर्शितानां सर्वेषां प्रहसनानां मार्गदर्शकाः, निर्देशकाः, सङ्गीतकाराश्च प्रशंसनार्हं कार्यं कृतवन्त इति अभिवन्दनार्हाः। संस्कृतरूपकाणि कानिचिद् बहोः कालात् पूर्वं रचितान्यपि समीचीनतया प्रस्तुतानि सहृदयहृदयाह्लादजनने समर्थानीति स्पष्टं साधितं नाट्योत्सवेन।

पूर्वरङ्गो भरतोक्तदिशा भोपालपरिसरेण प्रयोजितश्चेतोहर आसीत्। तत्र नटानां पदविन्यासो लयमनुगतः रसिकमनांस्याकर्षत्। सङ्गीतकं नितान्तं रमणीयम् आसीत्। गायकानां कण्ठश्रीः मानसं ह्लादयति स्म। प्रदर्शयितुं निश्चितानां सर्वेषां रूपकाणां किञ्चित् किञ्चिद् यदायोजनम् अकारि तदपूर्वं सुन्दरं बन्धुरं च। अयं पूर्वरङ्गः प्राचीने काले कथं क्रियते स्म इति ज्ञातवान् निर्देशकः तत्र नौतन्यम् अपि योजितवान्। इदं स्वागतार्हं मन्ये। प्रहसनानां प्रारम्भे प्रदर्शनस्य यानि तन्त्राणि आश्रितानि, तानि चित्ताकर्षणक्षमाण्यासन्। एकैकोऽपि परिसरस्तत्र वैशिष्ट्यं प्रादर्शयत्। प्रेक्षकेषु दिदृक्षा वर्धिता। स्वयं ये नाटकानि च्छात्रैः प्रयियोजयिषन्ति, तेषाम् एतन्नाट्योत्सवदर्शनेन महान् लाभो भवतीति मे मतिः।

प्रायः सर्वैरपि नटैः शुद्धं मधुरं चोच्चारणं कृतम्। किन्तु केचन तत्र हिन्दीभाषोच्चारणमनुसरन्तः अकारान्तपदानां समासमध्यपतितानाम् अन्तिमम् अकारं नोच्चारयन्ति स्म। एष दोषः परिहरणीयः। वेषभूषादिरूपः आहार्याभिनयः समीचीनोऽवर्तत। नाटकात्प्रहसनस्य महान् भेदोऽस्ति आङ्गिकाभिनये। नाटके गम्भीरोऽभिनयः। प्रहसने विकृतः सोऽपेक्षितः। अत्र हासजननस्यैव प्रधानोद्देशत्वात्। प्रहसने पात्राण्येव तादृशानि। मूढाः, मूर्खाः, वञ्चकाः, शठाः, चरित्रहीनाश्च तस्मिन् दृश्यन्ते। अनेकेषु प्रहसनेषु अश्लीलानि वाक्यानि, असभ्यानि सम्भाषणानि च भवन्तीति विदितमेव विदुषाम्। राष्ट्रियसंस्कृतसंस्थानं प्रहसनानां चयने दाक्ष्यं प्रादर्शयदिति महतः प्रमोदस्य स्थानम्।

आदौ प्रदर्शितयोः प्रहसनयोः (लटकमेलक-वञ्चकपञ्चकाख्ययोः) नातीव

## संस्कृत नाट्यमहोत्सव

"विवाह-विडम्बनम्" के निर्देशक और रंग-विधान की समीक्षा करें तो कोई भी समीक्षक वाह वाह किए बिना नहीं रह सकता। निर्देशक ने सभागार के "बैकड्रॉप" का उपयोग कर विशेष प्रकाश-प्रभाव के साथ नान्दी की प्रस्तुति कर दर्शकों के मन मोहित कर दिया। निर्देशक ने नाट्य के नायक रतिकान्त के सेवक 'कंक' को चार भूमिकाओं में दिखाकर प्रयोग को अद्भुत एवं अद्वितीय बना दिया है। फिल्मी-गीतों की धुनों का अनुकीर्तन भी दर्शकों को झुमाता रहा है। गुरुवायूर-परिसर का "मत्तविलासम्" निश्चित रूप से बेजोड़ प्रहसन है। अभिनयों के विविध प्रकारों, संवाद प्रस्तुति तथा निर्देशन सभी कुछ एकलय में होने के कारण दर्शकों को बराबर बाँधे रखने में सफल रहे हैं। गुरुवायूर की प्रस्तुतियों के वाचिक-प्रदर्शन के लिए संस्कृत की ध्वनिओं के पूर्ण और शुद्ध-उच्चारण पर अधिक ध्यान देने की आवश्यकता महसूस की जाती रही है। केरल और कर्णाटक में शास्त्रीय और लोक-रंगकर्म की जीवन्त और गतिमान कला-परम्पराओं के कारण उनका नाट्य-बोध सतत ग्राह्य है। इन दोनों परिसरों के रंगप्रयोग शेष भारत के नटों के लिए अनुकरणीय है।

–के. सी. त्रिपाठी

प्रोफेसर एवं अध्यक्ष भाषा शिक्षा विभाग

# तेरहवाँ संस्कृत नाट्यमहोत्सव

**–अभिराज राजेन्द्र मिश्र**



वर्तमान सत्र में 24.2.2016 से 26.02.2016 तक लोकविश्रुत राष्ट्रिय संस्कृतसंस्थान के तत्त्वावधान में संस्थानाङ्गभूत ग्यारह परिसरों द्वारा विविध नाट्यों का मञ्चन सम्पन्न किया गया। जैसा कि संस्थान की नीति रही है, पिछले वर्षों में भी, **दशरूपक** के किसी विशिष्ट भेद का ही उपस्थापन सम्पन्न होता रहा है ताकि मञ्चप्रस्तुति में रसचर्वणैकता बनी रहे साथ ही प्रतिभागी परिसरों की नाट्यकलाकुशलता का भी तुलनात्मक **सर्वोत्तमत्व** निर्णीत किया जा सके। इस दृष्टि से संस्थान कभी **नाटकों** का, तो कभी **नाटिकाओं** का, कभी **व्यायोग** मात्र का तो कभी **प्रकरणों** का अभिनय कराता रहा है।



यह वर्ष हास्यरूपकों अथवा **प्रहसनों** की प्रस्तुति का था। इस क्रम में रणवीर परिसर, जम्मू ने **लटकमेलक** का (24.2.2016, अपराह्ण), एकलव्य परिसर, अगरतला ने **वञ्चकपञ्चकम्** का (24.02.2016, अपराह्ण), वेदव्यास परिसर, बलाहर, हिमाचलप्रदेश ने **कुहनाभैक्षवम्** का (24.02.2016, सन्ध्या), गङ्गानाथ झा परिसर, इलाहाबाद ने **मृदङ्गदासप्रहसन** का (25.02.2016, पूर्वाह्ण), लखनऊ ने **स्नुषाविजय** का (25.02.2216, मध्याह्न) सदाशिव परिसर, पुरी ने **हास्यार्णव** प्रहसन का (25.02.2016, अपराह्ण), जयपुर ने **पलाण्डुमण्डनम्** का (25.02.2016, अपराह्ण), गुरुवायूर ने **मत्तविलास** प्रहसन का (25.02.2016, सन्ध्या), मुम्बई ने **विवाहविडम्बनम्** का (26. 02.2016 पूर्वाह्ण), भोपाल ने **हास्यचूडामणि** का (26.02.2016 मध्याह्न) तथा राजीवगांधी परिसर, श्रृङ्गेरी ने **भगवदज्जुकीयम्** का (26.02.2016, अपराह्ण) सशक्त एवं रोचक अभिनय प्रस्तुत किया।



रूपकों की प्रस्तुति में यूँ तो समस्त पात्र आद्यन्त सफलता की कामना करते हैं। प्रतिपात्र यत्न का आधान भी करते हैं तथापि मञ्चप्रस्तुति की प्रायोगिक सफलता सदा-सदा से रंग के ही अधीन रही है। महाकवि कालिदास ने अभिज्ञानशाकुन्तल की भूमिका में स्वयं कहा है –

**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥**



मैं इन रूपकों की मञ्चप्रस्तुतियों के दर्शकों तथा मूल्यांकनकारों में एक था। मैं यहाँ अपना अभिमत प्रकट करने से पूर्व, अपने **मूल्यांकनाधार** के विषय में कुछ कह देना उचित समझता हूँ–

1. मेरा विचार है कि संस्कृतरूपकों का अभिनय उनकी रचनावधि (कालखण्ड) को ध्यान में रखकर किया जाय।
2. मञ्चप्रस्तुति में **पुस्त** (सन्धिम, व्याजिम, चेष्टिम तथा सञ्जीवादि) का प्रयोग भी नाट्यविशेष की रचनावधि में, उन पुस्तों की उपलब्धता या सम्भावना को दृष्टि में रखकर किया जाय।
3. संस्कृत रूपकों के मञ्चन को चलचित्रों तथा बालीवुड के प्रभावों से सर्वथा मुक्त रखा जाय। अन्यथा रसचर्वणा भी **शुद्ध** न होकर, संकीर्ण कोटिक होने लगती है।









# तेरहवाँ संस्कृत नाट्यमहोत्सव

**–अभिराज राजेन्द्र मिश्र**

वर्तमान सत्र में 24.2.2016 से 26.02.2016 तक लोकविश्रुत राष्ट्रिय संस्कृतसंस्थान के तत्त्वावधान में संस्थानाङ्गभूत ग्यारह परिसरों द्वारा विविध नाट्यों का मञ्चन सम्पन्न किया गया। जैसा कि संस्थान की नीति रही है, पिछले वर्षों में भी, **दशरूपक** के किसी विशिष्ट भेद का ही उपस्थापन सम्पन्न होता रहा है ताकि मञ्चप्रस्तुति में रसचर्वणैकता बनी रहे साथ ही प्रतिभागी परिसरों की नाट्यकलाकुशलता का भी तुलनात्मक **सर्वोत्तमत्व** निर्णीत किया जा सके। इस दृष्टि से संस्थान कभी **नाटकों** का, तो कभी **नाटिकाओं** का, कभी **व्यायोग** मात्र का तो कभी **प्रकरणों** का अभिनय कराता रहा है।

यह वर्ष हास्यरूपकों अथवा **प्रहसनों** की प्रस्तुति का था। इस क्रम में रणवीर परिसर, जम्मू ने **लटकमेलक** का (24.2.2016, अपराह्ण), एकलव्य परिसर, अगरतला ने **वञ्चकपञ्चकम्** का (24.02.2016, अपराह्ण), वेदव्यास परिसर, बलाहर, हिमाचलप्रदेश ने **कुहनाभैक्षवम्** का (24.02.2016, सन्ध्या), गङ्गानाथ झा परिसर, इलाहाबाद ने **मृदङ्गदासप्रहसन** का (25.02.2016, पूर्वाह्ण), लखनऊ ने **स्नुषाविजय** का (25.02.2216, मध्याह्न) सदाशिव परिसर, पुरी ने **हास्यार्णव** प्रहसन का (25.02.2016, अपराह्ण), जयपुर ने **पलाण्डुमण्डनम्** का (25.02.2016, अपराह्ण), गुरुवायूर ने **मत्तविलास** प्रहसन का (25.02.2016, सन्ध्या), मुम्बई ने **विवाहविडम्बनम्** का (26. 02.2016 पूर्वाह्ण), भोपाल ने **हास्यचूडामणि** का (26.02.2016 मध्याह्न) तथा राजीवगांधी परिसर, शृङ्गेरी ने **भगवदज्जुकीयम्** का (26.02.2016, अपराह्ण) सशक्त एवं रोचक अभिनय प्रस्तुत किया।

रूपकों की प्रस्तुति में यूँ तो समस्त पात्र आद्यन्त सफलता की कामना करते हैं। प्रतिपात्र यत्न का आधान भी करते हैं तथापि मञ्चप्रस्तुति की प्रायोगिक सफलता सदा-सदा से रंग के ही अधीन रही है। महाकवि कालिदास ने अभिज्ञानशाकुन्तल की भूमिका में स्वयं कहा है –

**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥**

मैं इन रूपकों की मञ्चप्रस्तुतियों के दर्शकों तथा मूल्यांकनकारों में एक था। मैं यहाँ अपना अभिमत प्रकट करने से पूर्व, अपने **मूल्यांकनाधार** के विषय में कुछ कह देना उचित समझता हूँ–

1. मेरा विचार है कि संस्कृतरूपकों का अभिनय उनकी रचनावधि (कालखण्ड) को ध्यान में रखकर किया जाय।
2. मञ्चप्रस्तुति में **पुस्त** (सन्धिम, व्याजिम, चेष्टिम तथा सञ्जीवादि) का प्रयोग भी नाट्यविशेष की रचनावधि में, उन पुस्तों की उपलब्धता या सम्भावना को दृष्टि में रखकर किया जाय।
3. संस्कृत रूपकों के मञ्चन को चलचित्रों तथा बालीवुड के प्रभावों से सर्वथा मुक्त रखा जाय। अन्यथा रसचर्वणा भी **शुद्ध** न होकर, संकीर्ण कोटिक होने लगती है।

# तेरहवाँ संस्कृत नाट्यमहोत्सव

**–अभिराज राजेन्द्र मिश्र**

वर्तमान सत्र में 24.2.2016 से 26.02.2016 तक लोकविश्रुत राष्ट्रिय संस्कृतसंस्थान के तत्त्वावधान में संस्थानाङ्गभूत ग्यारह परिसरों द्वारा विविध नाट्यों का मञ्चन सम्पन्न किया गया। जैसा कि संस्थान की नीति रही है, पिछले वर्षों में भी, **दशरूपक** के किसी विशिष्ट भेद का ही उपस्थापन सम्पन्न होता रहा है ताकि मञ्चप्रस्तुति में रसचर्वणैकता बनी रहे साथ ही प्रतिभागी परिसरों की नाट्यकलाकुशलता का भी तुलनात्मक **सर्वोत्तमत्व** निर्णीत किया जा सके। इस दृष्टि से संस्थान कभी **नाटकों** का, तो कभी **नाटिकाओं** का, कभी **व्यायोग** मात्र का तो कभी **प्रकरणों** का अभिनय कराता रहा है।

यह वर्ष हास्यरूपकों अथवा **प्रहसनों** की प्रस्तुति का था। इस क्रम में रणवीर परिसर, जम्मू ने **लटकमेलक** का (24.2.2016, अपराह्ण), एकलव्य परिसर, अगरतला ने **वञ्चकपञ्चकम्** का (24.02.2016, अपराह्ण), वेदव्यास परिसर, बलाहर, हिमाचलप्रदेश ने **कुहनाभैक्षवम्** का (24.02.2016, सन्ध्या), गङ्गानाथ झा परिसर, इलाहाबाद ने **मृदङ्गदासप्रहसन** का (25.02.2016, पूर्वाह्ण), लखनऊ ने **स्नुषाविजय** का (25.02.2216, मध्याह्न) सदाशिव परिसर, पुरी ने **हास्यार्णव** प्रहसन का (25.02.2016, अपराह्ण), जयपुर ने **पलाण्डुमण्डनम्** का (25.02.2016, अपराह्ण), गुरुवायूर ने **मत्तविलास** प्रहसन का (25.02.2016, सन्ध्या), मुम्बई ने **विवाहविडम्बनम्** का (26. 02.2016 पूर्वाह्ण), भोपाल ने **हास्यचूडामणि** का (26.02.2016 मध्याह्न) तथा राजीवगांधी परिसर, शृङ्गेरी ने **भगवदज्जुकीयम्** का (26.02.2016, अपराह्ण) सशक्त एवं रोचक अभिनय प्रस्तुत किया।

रूपकों की प्रस्तुति में यूँ तो समस्त पात्र आद्यन्त सफलता की कामना करते हैं। प्रतिपात्र यत्न का आधान भी करते हैं तथापि मञ्चप्रस्तुति की प्रायोगिक सफलता सदा-सदा से रंग के ही अधीन रही है। महाकवि कालिदास ने अभिज्ञानशाकुन्तल की भूमिका में स्वयं कहा है –

**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥**

मैं इन रूपकों की मञ्चप्रस्तुतियों के दर्शकों तथा मूल्यांकनकारों में एक था। मैं यहाँ अपना अभिमत प्रकट करने से पूर्व, अपने **मूल्यांकनाधार** के विषय में कुछ कह देना उचित समझता हूँ–

1. मेरा विचार है कि संस्कृतरूपकों का अभिनय उनकी रचनावधि (कालखण्ड) को ध्यान में रखकर किया जाय।
2. मञ्चप्रस्तुति में **पुस्त** (सन्धिम, व्याजिम, चेष्टिम तथा सञ्जीवादि) का प्रयोग भी नाट्यविशेष की रचनावधि में, उन पुस्तों की उपलब्धता या सम्भावना को दृष्टि में रखकर किया जाय।
3. संस्कृत रूपकों के मञ्चन को चलचित्रों तथा बालीवुड के प्रभावों से सर्वथा मुक्त रखा जाय। अन्यथा रसचर्वणा भी **शुद्ध** न होकर, संकीर्ण कोटिक होने लगती है।





















# वर्तमान शताब्दी की नई रंगबोध-यात्रा

**–बलदेवानंद सागर**

व्यक्तिगत रूप से प्रतिवर्ष बड़ी उत्सुकता के साथ राष्ट्रिय संस्कृत संस्थान द्वारा आयोजित होने वाले नाट्यमहोत्सव की प्रतीक्षा करता रहता हूँ। यद्यपि इस नाट्यमहोत्सव की पूर्व-भूमिका से अधिकृत रूप से जुड़ा हुआ न होने पर भी हमेशा, अपने आपको संस्थान के इस चाक्षुष-यज्ञात्मक अनुष्ठान से गहरे भावनात्मक रूप से जुड़ा हुआ पाता हूँ। इस का कारण केवल यही है कि आरम्भ में "वसन्त-महोत्सव" और बाद में "कौमुदीमहोत्सव" तथा अब "नाट्यमहोत्सव" के रूप में प्रतिवर्ष निर्बाधरूप से आयोजित होने वाले संस्थान के इस लोकोपकारी, विशेषरूप से समृद्ध संस्कृत-रंगकर्म के उपकारी अनुष्ठान के पहले उपक्रम से ही मुझे निर्णायक के रूप में सेवा करने का सौभाग्य मिलता रहा है।

संस्थान के तत्कालीन कुलपति आचार्य कुटुम्बशास्त्री जी के कार्यकाल से [सन्-2004 से] शुरू हुये वसन्तोत्सव को आचार्य राधावल्लभ त्रिपाठी जी ने अपने कुलपतित्व में पल्लवित किया और अब आचार्य परमेश्वर-नारायण-शास्त्री जी के कुलपतित्व में इस वर्ष [24 से 26 फरवरी 2016] सम्पन्न हो रहे इस तेरहवें प्रहसन के महासंगम-रूप नाट्य-महोत्सव की समीक्षात्मक आलोचना से पूर्व, पूर्व-पीठिका के रूप में कुछ कहना समुचित होगा।

## पूर्व-पीठिका

जब वर्ष-2004 में प्रथम "वसन्त-महोत्सव" के रूप में "आन्ध्रभवन" के प्रेक्षागृह में यह आयोजन सम्पन्न हुआ तो सभी संस्कृतानुरागी, रंगकर्म-प्रेमी और संस्कृत-छात्र-अध्यापक एक विचित्र-सी अनुभूति से भरे हुए थे, एक आशा और एक परिवर्तन की अपेक्षा के साथ।

"आन्ध्रभवन" का प्रेक्षागृह इस प्रकार के स्पर्धात्मक नाट्य-महोत्सव के लिए छोटा होने से, बाद के बहुत-सारे नाट्य-महोत्सव एल्.टी.जी. प्रेक्षागार [मण्डी-हाउस], कमानी आडीटोरियम्, हिन्दूमहाविद्यालय प्रेक्षागृह और श्रीशंकरलाल-प्रेक्षागृह में आयोजित किये गये। इस तेरहवें नाट्यमहोत्सव की उल्लेखनीय विशेषता यही मानी जायेगी कि नाट्य-महोत्सव के संयोजक आचार्य रमाकान्त पाण्डेय के रचनात्मक प्रयासों के कारण पहली बार सर्वपल्ली डॉ. राधाकृष्णन् सभागार [केन्द्रीय विद्यालय-2, दिल्ली-केन्ट] जैसा अधुनातन-सुविधा और तकनीकी-विशेषता से लैस विशाल प्रेक्षागृह मिला जिसका पूरा उपयोग, प्रहसन प्रस्तुत करते हुए, विभिन्न परिसरों ने किया। इसी कड़ी में एक और बात जोड़ना चाहूँगा कि इस वर्ष पहली बार इस नाट्य-महोत्सव से पहले "प्रेस-क्लब" में औपचारिक "प्रेस-कोन्फ्रेन्स्" [23 फरवरी 2016] का आयोजन करके इस महोत्सव को राजधानी के अन्य रंग-महोत्सवों की मुख्यधारा के साथ जोड़ने का अच्छा प्रयास किया गया है जिसका पूर्ण श्रेय माननीय कुलपति एवं संयोजक को जाता है।

## एक और उपलब्धि

आचार्य राधावल्लभ जी के कार्यकाल की अनेक विशिष्ट उपलब्धियों में से एक है-भोपाल-परिसर में नाट्य-अनुसन्धान केन्द्र का शुभारम्भ। इस तेरहवें नाट्य-महोत्सव

# वर्तमान शताब्दी की नई रंगबोध-यात्रा

–बलदेवानंद सागर

व्यक्तिगत रूप से प्रतिवर्ष बड़ी उत्सुकता के साथ राष्ट्रिय संस्कृत संस्थान द्वारा आयोजित होने वाले नाट्यमहोत्सव की प्रतीक्षा करता रहता हूँ। यद्यपि इस नाट्यमहोत्सव की पूर्व-भूमिका से अधिकृत रूप से जुड़ा हुआ न होने पर भी हमेशा, अपने आपको संस्थान के इस चाक्षुष-यज्ञात्मक अनुष्ठान से गहरे भावनात्मक रूप से जुड़ा हुआ पाता हूँ। इस का कारण केवल यही है कि आरम्भ में "वसन्त-महोत्सव" और बाद में "कौमुदीमहोत्सव" तथा अब "नाट्यमहोत्सव" के रूप में प्रतिवर्ष निर्बाधरूप से आयोजित होने वाले संस्थान के इस लोकोपकारी, विशेषरूप से समृद्ध संस्कृत-रंगकर्म के उपकारी अनुष्ठान के पहले उपक्रम से ही मुझे निर्णायक के रूप में सेवा करने का सौभाग्य मिलता रहा है।

संस्थान के तत्कालीन कुलपति आचार्य कुटुम्बशास्त्री जी के कार्यकाल से [सन्-2004 से] शुरू हुये वसन्तोत्सव को आचार्य राधावल्लभ त्रिपाठी जी ने अपने कुलपतित्व में पल्लवित किया और अब आचार्य परमेश्वर-नारायण-शास्त्री जी के कुलपतित्व में इस वर्ष [24 से 26 फरवरी 2016] सम्पन्न हो रहे इस तेरहवें प्रहसन के महासंगम-रूप नाट्य-महोत्सव की समीक्षात्मक आलोचना से पूर्व, पूर्व-पीठिका के रूप में कुछ कहना समुचित होगा।

## पूर्व-पीठिका

जब वर्ष-2004 में प्रथम "वसन्त-महोत्सव" के रूप में "आन्ध्रभवन" के प्रेक्षागृह में यह आयोजन सम्पन्न हुआ तो सभी संस्कृतानुरागी, रंगकर्म-प्रेमी और संस्कृत-छात्र-अध्यापक एक विचित्र-सी अनुभूति से भरे हुए थे, एक आशा और एक परिवर्तन की अपेक्षा के साथ।



"आन्ध्रभवन" का प्रेक्षागृह इस प्रकार के स्पर्धात्मक नाट्य-महोत्सव के लिए छोटा होने से, बाद के बहुत-सारे नाट्य-महोत्सव एल्.टी.जी. प्रेक्षागार [मण्डी-हाउस], कमानी आडीटोरियम्, हिन्दूमहाविद्यालय प्रेक्षागृह और श्रीशंकरलाल-प्रेक्षागृह में आयोजित किये गये। इस तेरहवें नाट्यमहोत्सव की उल्लेखनीय विशेषता यही मानी जायेगी कि नाट्य-महोत्सव के संयोजक आचार्य रमाकान्त पाण्डेय के रचनात्मक प्रयासों के कारण पहली बार सर्वपल्ली डॉ. राधाकृष्णन् सभागार [केन्द्रीय विद्यालय-2, दिल्ली-केन्ट] जैसा अधुनातन-सुविधा और तकनीकी-विशेषता से लैस विशाल प्रेक्षागृह मिला जिसका पूरा उपयोग, प्रहसन प्रस्तुत करते हुए, विभिन्न परिसरों ने किया। इसी कड़ी में एक और बात जोड़ना चाहूँगा कि इस वर्ष पहली बार इस नाट्य-महोत्सव से पहले "प्रेस-क्लब" में औपचारिक "प्रेस-कोन्फ्रेन्स्" [23 फरवरी 2016] का आयोजन करके इस महोत्सव को राजधानी के अन्य रंग-महोत्सवों की मुख्यधारा के साथ जोड़ने का अच्छा प्रयास किया गया है जिसका पूर्ण श्रेय माननीय कुलपति एवं संयोजक को जाता है।

## एक और उपलब्धि

आचार्य राधावल्लभ जी के कार्यकाल की अनेक विशिष्ट उपलब्धियों में से एक है-भोपाल-परिसर में नाट्य-अनुसन्धान केन्द्र का शुभारम्भ। इस तेरहवें नाट्य-महोत्सव के पूर्वरंग को देखकर संस्कृत- रंगप्रेमियों को अवश्यमेव एक सुखद अनुभूति हुयी होगी कि इस नाट्य-अनुसन्धान-केन्द्र के प्रयासों के कारण पूर्वरंग के सभी [भोपालपरिसर के] कलाकारों की रंग-अभिव्यक्ति निःसन्देह रमणीय और हृदयावर्जक थी। पूर्वरंग के संगीत और रंगमंच की नाट्यधर्मी सज्जा का विशेष-उल्लेख करना न्यायसंगत होगा।

## "लटकमेलकम्" और "वञ्चकपञ्चकम्"

रा.सं.सं. के जम्मू-स्थित श्रीरणवीर-परिसर के विद्यार्थियों ने लोकप्रिय प्रहसन "लटक-मेलकम्" की प्रस्तुति करके यह बात सिद्ध कर दी कि इस परिसर में रंगविधान और नाट्य-शिल्प के बारे में अध्यापक और छात्र अब विशेष ध्यान देने लगे हैं। श्रीशंखधर













# प्रहसनरङ्गदर्शनम्

–आजादमिश्रो 'मधुकरः'

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) प्रतिवर्षं मुख्यालये दिल्लीनगरे परिसरीयच्छात्रीछात्रकुशीलवानां संस्कृतनाट्यस्पर्धाम् आयोजयति। ऐषमः षोडशाधिकद्विसहस्रतमे ईशाब्दे स्पर्धेयं 'त्रयोदशः संस्कृतनाट्यमहोत्सवः' इति नाम्ना फरवरी-मासस्य चतुर्विंशदिनाङ्कात् षड्विंशं (24.02.2016-26.02.2016) यावत् त्रिदिवसीया समायोजिता। इतः पूर्वम् 2003-04 तमात् शिक्षासत्रात् पञ्च वर्षाणि 'वसन्तोत्सवः' इत्यभिधानेन स्पर्धेयं प्रारम्भि, ततः सा 2008-09 तमात् शिक्षासत्रात् इत्यभिधानमधारि। ऐषमः पुनः 'संस्कृतनाट्यमहोत्सवः' इत्यभिख्यया शङ्के कदाचिद् 'अखिलभारतीयसंस्कृतनाट्यमहोत्सवः' इहैवान्तर्हितो न भवेदिति। वस्तुतः संस्थानस्य भोपालपरिसरे स्थापितस्य नाट्यानुसन्धानकेन्द्रस्य वार्षिकोपलब्धिभूतं रङ्गमञ्चप्रयोगे नवानुसन्धानमिव स्यादेतदिति मनसिकृत्य समुद्भावितं पुरा मन्ये अखिलभारतीयसंस्कृतनाट्य-महोत्सवनवनीतं सामाजिकानाम्। अस्तु तावत्, भविता भव्यं भवेशस्य।

अस्यां स्पर्धायां प्रसिद्धानि संस्कृतस्य प्राचीनानि नाटकानि पूर्वं मञ्चितानि अभूवन्। ततः मञ्चप्रयोगस्य एकहोराकालनिर्धारणात् विशालनाटकानां विभक्ता निर्धारिताङ्काः एव परिसरच्छात्रैः मञ्चिताः। एवं रीत्या संस्कृतस्य प्रायः प्रमुखानि नाटकानि अभिज्ञानशाकुन्तलम्, वासवदत्ता-उत्तररामचरितम्, महावीरचरितम्, मुद्राराक्षसः, वेणीसंहारम् प्रभृतीनि सम्यङ्मञ्चितानि। एवञ्च नाट्यस्पर्धायामादौ नाटकरङ्गप्रयोगोऽभूत्, अतश्च स नाटकप्रयोग-पर्यायकालोऽवगन्तव्यः। ततश्च संस्कृतप्रकरणप्रयोगपर्यायः सत्रद्वयव्यापी महता समारोहेण अभिनव-प्रयोगेण च समायोजितः, यत्र खलु मृच्छकटिक-मालतीमाधवादीनि प्रथितानि इतराणि च प्रबुद्धरौहिणेयादीनि प्रकरणानि रङ्गप्रयोगे समानीतानि संस्कृतसाहित्यस्य कामपि अपूर्वां शोभामवाकिरन् सभ्येषु।

24.2.2016 तः 26.2.2016 पर्यन्तं समायोजिते त्रिदिवसीयेऽस्मिन् त्रयोदशे संस्कृतनाट्यमहोत्सवे राष्ट्रिय-संस्कृतसंस्थानस्य सर्वेऽपि एकादश परिसराः स्वं-स्वं पूर्वनिर्धारितं प्रहसनं नियतावधौ रञ्जकतया रङ्गमञ्चे प्रास्तुवन्। प्रयोगेऽस्मिन् आङ्गिकादिचर्तुष्वपि अभिनयप्रकारेषु छात्रीछात्रकुशीलवानाम् उत्तरोत्तरम् अभिनयकौशलं परिस्फुटं सत् सभ्यान् समारञ्जयत्, रससिन्धौ चाकण्ठं न्यमज्जयत्, निःशब्दं निस्तब्धं च समधारयत् प्रेक्षागृहम् आप्रयोगम्। किञ्च मञ्चसज्जायां निर्देशकानाम् अभिनवतकनीकसंयोगोऽप्यद्भुतः परिवेश-सृष्टिसमर्थः सन् आश्चर्यमानन्दमयम् अजीजनत्। किञ्च सर्वेष्वपि प्रदर्शनेषु संगीतसङ्गतिरपि समुचित-मधुररव-सम्मिश्रणकौशलं संगीतनिर्देशकानां समलक्षयत्।

इह हि नटराजाराधनायां प्रस्तुतेषु एकादशसु रङ्गप्रयोगेषु प्रतिरङ्गं कुशीलवाः केचन नितान्तं निपुणाः कलाजीविन इव स्वकीयमभिनयकौशलं प्रादर्शयन्, अतः नाट्यकलाकुशलैर्निर्णायकवर्यैः प्रतिरङ्गं केचन कुशीलवाः पुरस्कारार्हत्वेन पुरस्कृताः। किञ्च प्रस्तुतेषु सर्वेष्वपि प्रयोगेषु एका छात्रा सर्वोत्तमाभिनेत्रीरूपेण एकश्छात्रश्च सर्वोत्तमाभिनेतृरूपेण तैरचायिषाताम्। एवमेव नाट्य-संगीत-मञ्चसज्जानिर्देशनार्थमपि पृथक्पृथक् सर्वोत्तमपुरस्कारभाजो निर्देशकाश्चिता अभूवन्निति सर्वथौचितीमावहति। अथ च निर्णायका रङ्गमञ्चप्रस्तुतिदृशा मत्तविलासप्रहसनं सर्वोत्तमं प्रथमम् अचैषुः। ते च रङ्गप्रयोगे द्वितीयस्थानं विवाहविडम्बनाय प्रादुः, तृतीयस्थाने च भगवदज्जुकीयं स्थापितवन्तः। तत्र निर्णायकानां निर्णयोऽयं सर्वथा युक्तम् इति भावुका अनुभवन्ति। एतेषु त्रिषु प्रयोगेषु सर्वथा समीचीनं तारतम्यनिर्धारणं मन्ये परीक्षकाणां परीक्षणसूक्ष्मदृष्टिमभिव्यनक्ति। तथाहि–

# प्रहसनरङ्गदर्शनम्

–आजादमिश्रो 'मधुकरः'

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) प्रतिवर्षं मुख्यालये दिल्लीनगरे परिसरीयच्छात्रीछात्रकुशीलवानां संस्कृतनाट्यस्पर्धाम् आयोजयति। ऐषमः षोडशाधिकद्विसहस्रतमे ईशाब्दे स्पर्धेयं 'त्रयोदशः संस्कृतनाट्यमहोत्सवः' इति नाम्ना फरवरी-मासस्य चतुर्विंशदिनाङ्कात् षड्विंशं (24.02.2016-26.02.2016) यावत् त्रिदिवसीया समायोजिता। इतः पूर्वम् 2003-04 तमात् शिक्षासत्रात् पञ्च वर्षाणि 'वसन्तोत्सवः' इत्यभिधानेन स्पर्धेयं प्रारम्भि, ततः सा 2008-09 तमात् शिक्षासत्रात् इत्यभिधानमधारि। ऐषमः पुनः 'संस्कृतनाट्यमहोत्सवः' इत्यभिख्यया शङ्के कदाचिद् 'अखिलभारतीयसंस्कृतनाट्यमहोत्सवः' इहैवान्तर्हितो न भवेदिति। वस्तुतः संस्थानस्य भोपालपरिसरे स्थापितस्य नाट्यानुसन्धानकेन्द्रस्य वार्षिकोपलब्धिभूतं रङ्गमञ्चप्रयोगे नवानुसन्धानमिव स्यादेतदिति मनसिकृत्य समुद्भावितं पुरा मन्ये अखिलभारतीयसंस्कृतनाट्य-महोत्सवनवनीतं सामाजिकानाम्। अस्तु तावत्, भविता भव्यं भवेशस्य।

अस्यां स्पर्धायां प्रसिद्धानि संस्कृतस्य प्राचीनानि नाटकानि पूर्वं मञ्चितानि अभूवन्। ततः मञ्चप्रयोगस्य एकहोराकालनिर्धारणात् विशालनाटकानां विभक्ता निर्धारिताङ्काः एव परिसरच्छात्रैः मञ्चिताः। एवं रीत्या संस्कृतस्य प्रायः प्रमुखानि नाटकानि अभिज्ञानशाकुन्तलम्, वासवदत्ता-उत्तररामचरितम्, महावीरचरितम्, मुद्राराक्षसः, वेणीसंहारम् प्रभृतीनि सम्यङ्मञ्चितानि। एवञ्च नाट्यस्पर्धायामादौ नाटकरङ्गप्रयोगोऽभूत्, अतश्च स नाटकप्रयोग-पर्यायकालोऽवगन्तव्यः। ततश्च संस्कृतप्रकरणप्रयोगपर्यायः सत्रद्वयव्यापी महता समारोहेण अभिनव-प्रयोगेण च समायोजितः, यत्र खलु मृच्छकटिक-मालतीमाधवादीनि प्रथितानि इतराणि च प्रबुद्धरौहिणेयादीनि प्रकरणानि रङ्गप्रयोगे समानीतानि संस्कृतसाहित्यस्य कामपि अपूर्वां शोभामवाकिरन् सभ्येषु।

24.2.2016 तः 26.2.2016 पर्यन्तं समायोजिते त्रिदिवसीयेऽस्मिन् त्रयोदशे संस्कृतनाट्यमहोत्सवे राष्ट्रिय-संस्कृतसंस्थानस्य सर्वेऽपि एकादश परिसराः स्वं-स्वं पूर्वनिर्धारितं प्रहसनं नियतावधौ रञ्जकतया रङ्गमञ्चे प्रास्तुवन्। प्रयोगेऽस्मिन् आङ्गिकादिचर्तुष्वपि अभिनयप्रकारेषु छात्रीछात्रकुशीलवानाम् उत्तरोत्तरम् अभिनयकौशलं परिस्फुटं सत् सभ्यान् समारञ्जयत्, रससिन्धौ चाकण्ठं न्यमज्जयत्, निःशब्दं निस्तब्धं च समधारयत् प्रेक्षागृहम् आप्रयोगम्। किञ्च मञ्चसज्जायां निर्देशकानाम् अभिनवतकनीकसंयोगोऽप्यद्भुतः परिवेश-सृष्टिसमर्थः सन् आश्चर्यमानन्दमयम् अजीजनत्। किञ्च सर्वेष्वपि प्रदर्शनेषु संगीतसङ्गतिरपि समुचित-मधुररव-सम्मिश्रणकौशलं संगीतनिर्देशकानां समलक्षयत्।

इह हि नटराजाराधनायां प्रस्तुतेषु एकादशसु रङ्गप्रयोगेषु प्रतिरङ्गं कुशीलवाः केचन नितान्तं निपुणाः कलाजीविन इव स्वकीयमभिनयकौशलं प्रादर्शयन्, अतः नाट्यकलाकुशलैर्निर्णायकवर्यैः प्रतिरङ्गं केचन कुशीलवाः पुरस्कारार्हत्वेन पुरस्कृताः। किञ्च प्रस्तुतेषु सर्वेष्वपि प्रयोगेषु एका छात्रा सर्वोत्तमाभिनेत्रीरूपेण एकश्छात्रश्च सर्वोत्तमाभिनेतृरूपेण तैरचायिषाताम्। एवमेव नाट्य-संगीत-मञ्चसज्जानिर्देशनार्थमपि पृथक्पृथक् सर्वोत्तमपुरस्कारभाजो निर्देशकाश्चिता अभूवन्निति सर्वथौचितीमावहति। अथ च निर्णायका रङ्गमञ्चप्रस्तुतिदृशा मत्तविलासप्रहसनं सर्वोत्तमं प्रथमम् अचैषुः। ते च रङ्गप्रयोगे द्वितीयस्थानं विवाहविडम्बनाय प्रादुः, तृतीयस्थाने च भगवदज्जुकीयं स्थापितवन्तः। तत्र निर्णायकानां निर्णयोऽयं सर्वथा युक्तम् इति भावुका अनुभवन्ति। एतेषु त्रिषु प्रयोगेषु सर्वथा समीचीनं तारतम्यनिर्धारणं मन्ये परीक्षकाणां





















# त्रयोदशसंस्कृतनाट्यमहोत्सवः
## ( किञ्चन विहङ्गावलोकनम् )

-डॉ. विश्वासः

अखिले भारते संस्कृतशिक्षायाः दशायाः दिशायाश्च निर्णये बद्धपरिकरेण राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् आयोज्यमानः परिसरीयच्छात्राणां संस्कृतनाट्यमहोत्सवः ऐषमः षोडशाधिकद्विसहस्रतमे वर्षे फेब्रवरीमासस्य चतुर्विंशतितमदिनाङ्कात् षड्विंशतितमं दिनाङ्कं यावत् दिल्लीनगरे प्रावर्तत। दिनत्रयव्यापिनि अस्मिन् नाट्यमहोत्सवे एकादश प्रहसनानि परिसरीयच्छात्रैः तथा अभिनीतानि यदेते छात्राः न कस्यापि दृष्ट्या वृत्तिपरेभ्यः नाट्यकर्मिभ्यः अवराः इति।

संस्थानस्य कुलपतेः प्रो.परमेश्वरनारायणशास्त्रिमहाभागस्य आध्यक्ष्ये प्रवृत्ते अस्य नाट्यमहोत्सवस्य उद्घाटनकार्यक्रमे विख्यातः विद्वान् नानाशास्त्रविशारदश्च श्रीमान् हेच्. वि. नागराजरावमहोदयः श्रवणं रमणीयं बोधप्रदं च व्याख्यानं प्रस्तुवन् सहृदयानां हृदयानि आवर्जयन् तान् सर्वान् अपि जागरूकतया प्रहसनानां वीक्षणे उन्मुखान् अकरोत्। अत एव सहृदयाः अपि तल्लीनाः सन्तः प्रहसनानि अपश्यन्।

अस्य वर्षस्य नाट्यमहोत्सवे प्रहसनानां पर्यायः आसीत्। प्राचीनानि नूतनानि चेति कानिचित् प्रहसनानि चित्वा केन्द्रपक्षतः एव प्रत्येकं परिसराय किञ्चन प्रहसनम् अभिनयाय निर्दिष्टम् आसीत्। प्राप्तं प्रहसनं प्राचीनं भवतु, आधुनिकं वा, प्रत्येकं परिसरेण अपि अतिशयितेन मनोयोगेन पूर्वाभ्यासं कृत्वा तत्र आगत्य प्रहसनम् अभिनीतम् इत्येतत् महते मोदाय अकल्पत।

परिहासप्रधानं सम्भाषणम्, नट-विट-चेट-धूर्त-गणिकादीनां विशेषतया चित्रणं च प्रहसनेषु भवत्येव इत्यतः अस्मिन् नाट्यमहोत्सवे अभिनीतेषु सर्वेषु अपि प्रहसनेषु तत् अंशद्वयमपि प्रधानतया आसीदेव। तेन सह छात्राणाम् अभिनयकुशलता अपि सम्मिलिता आसीत् इत्यतः नाट्यमहोत्सवः अयं निश्चयेन भिन्नरुचेर्जनस्य बहुधा एकं समाराधनमेव आसीत्।

नाट्यमहोत्सवस्य आरम्भे प्रस्तुतं 'पूर्वरङ्गं' तु अतिविशिष्टं संस्कृतनाट्यपरम्परया, तद्द्वारा भारतीयनाट्यपरम्परायाः पुनस्स्मारकं च आसीत्। समाराधनस्य आरम्भे अवश्यं कर्तव्यस्य मङ्गलाचरणादिकस्य भरतमतानुसारेण उपस्थापनं नितान्तं हृद्यम् आसीत्।

नाट्यमहोत्सवे प्रथमे दिने त्रीणि प्रहसनानि प्रदर्शितानि अभवन्। तत्र प्रथमम् आसीत् श्रीरणवीरपरिसरच्छात्रैः अभिनीतं 'लटकमेलकम्'। अस्य प्रहसनस्य मञ्चसज्जा उत्तमा आसीत्। यद्यपि सर्वैः अपि छात्रैः सुष्ठु एव अभिनीतम्, तथापि जन्तुकेतोः कुलव्याधेश्च भूमिकाम् अभिनीतवन्तौ (पुरुषोत्तमदासः, अरुणकुमारनाइकश्च) विशेषतया अभिनन्दनपात्रतां गतौ।

द्वितीयं प्रहसनम् आसीत् अगरतलास्थस्य एकलव्यपरिसरस्य छात्रैः प्रस्तुतं 'वञ्चकपञ्चकम्'। प्रहसनस्य अस्य आङ्गिकाभिनयः वाचिकाभिनयश्च साधुः आसीत्। यद्यपि पञ्च अपि वञ्चकाः उत्तमम् अभिनयकौशलं प्रादर्शयन्, तथापि नायिकायाः दन्तुरायाः भूमिकां निरूढवती परिसरच्छात्रा प्रियङ्का शर्मा अभिनयेन सर्वान् अतिशयाना सकलसहृदयश्लाघनीयतां प्राप्नोत्।

वेदव्यासपरिसरच्छात्रैः अभिनीतं तृतीयं 'कुहनाभैक्षवं' नाम प्रहसनम्। मिथ्याचारप्रदर्शनपरस्य कस्यचित् भिक्षोः चरितं चित्रयत् इदं प्रहसनं विकृतं प्रहसनम्, यतः

# त्रयोदशसंस्कृतनाट्यमहोत्सवः
## (किञ्चन विहङ्गावलोकनम्)

–डॉ. विश्वासः



अखिले भारते संस्कृतशिक्षायाः दशायाः दिशायाश्च निर्णये बद्धपरिकरेण राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् आयोज्यमानः परिसरीयच्छात्राणां संस्कृतनाट्यमहोत्सवः ऐषमः षोडशाधिकद्विसहस्रतमे वर्षे फेब्रवरीमासस्य चतुर्विंशतितमदिनाङ्कात् षड्विंशतितमं दिनाङ्कं यावत् दिल्लीनगरे प्रावर्तत। दिनत्रयव्यापिनि अस्मिन् नाट्यमहोत्सवे एकादश प्रहसनानि परिसरीयच्छात्रैः तथा अभिनीतानि यदेते छात्राः न कस्यापि दृष्ट्या वृत्तिपरेभ्यः नाट्यकर्मिभ्यः अवराः इति।



संस्थानस्य कुलपतेः प्रो.परमेश्वरनारायणशास्त्रिमहाभागस्य आध्यक्ष्ये प्रवृत्ते अस्य नाट्यमहोत्सवस्य उद्घाटनकार्यक्रमे विख्यातः विद्वान् नानाशास्त्रविशारदश्च श्रीमान् हेच्. वि. नागराजरावमहोदयः श्रवणं रमणीयं बोधप्रदं च व्याख्यानं प्रस्तुवन् सहृदयानां हृदयानि आवर्जयन् तान् सर्वान् अपि जागरूकतया प्रहसनानां वीक्षणे उन्मुखान् अकरोत्। अत एव सहृदयाः अपि तल्लीनाः सन्तः प्रहसनानि अपश्यन्।

अस्य वर्षस्य नाट्यमहोत्सवे प्रहसनानां पर्यायः आसीत्। प्राचीनानि नूतनानि चेति कानिचित् प्रहसनानि चित्वा केन्द्रपक्षतः एव प्रत्येकं परिसराय किञ्चन प्रहसनम् अभिनयाय निर्दिष्टम् आसीत्। प्राप्तं प्रहसनं प्राचीनं भवतु, आधुनिकं वा, प्रत्येकं परिसरेण अपि अतिशयितेन मनोयोगेन पूर्वाभ्यासं कृत्वा तत्र आगत्य प्रहसनम् अभिनीतम् इत्येतत् महते मोदाय अकल्पत।



परिहासप्रधानं सम्भाषणम्, नट–विट–चेट–धूर्त–गणिकादीनां विशेषतया चित्रणं च प्रहसनेषु भवत्येव इत्यतः अस्मिन् नाट्यमहोत्सवे अभिनीतेषु सर्वेषु अपि प्रहसनेषु तत् अंशद्वयमपि प्रधानतया आसीदेव। तेन सह छात्राणाम् अभिनयकुशलता अपि सम्मिलिता आसीत् इत्यतः नाट्यमहोत्सवः अयं निश्चयेन भिन्नरुचेर्जनस्य बहुधा एकं समाराधनमेव आसीत्।



नाट्यमहोत्सवस्य आरम्भे प्रस्तुतं 'पूर्वरङ्गं' तु अतिविशिष्टं संस्कृतनाट्यपरम्परया, तद्द्वारा भारतीयनाट्यपरम्परायाः पुनस्स्मारकं च आसीत्। समाराधनस्य आरम्भे अवश्यं कर्तव्यस्य मङ्गलाचरणादिकस्य भरतमतानुसारेण उपस्थापनं नितान्तं हृद्यम् आसीत्।

नाट्यमहोत्सवे प्रथमे दिने त्रीणि प्रहसनानि प्रदर्शितानि अभवन्। तत्र प्रथमम् आसीत् श्रीरणवीरपरिसरच्छात्रैः अभिनीतं 'लटकमेलकम्'। अस्य प्रहसनस्य मञ्चसज्जा उत्तमा आसीत्। यद्यपि सर्वैः अपि छात्रैः सुष्ठु एव अभिनीतम्, तथापि जन्तुकेतोः कुलव्याधेश्च भूमिकाम् अभिनीतवन्तौ (पुरुषोत्तमदासः, अरुणकुमारनाइकश्च) विशेषतया अभिनन्दनपात्रतां गतौ।



द्वितीयं प्रहसनम् आसीत् अगरतलास्थस्य एकलव्यपरिसरस्य छात्रैः प्रस्तुतं 'वञ्चकपञ्चकम्'। प्रहसनस्य अस्य आङ्गिकाभिनयः वाचिकाभिनयश्च साधुः आसीत्। यद्यपि पञ्च अपि वञ्चकाः उत्तमम् अभिनयकौशलं प्रादर्शयन्, तथापि नायिकायाः दन्तुरायाः भूमिकां निरूढवती परिसरच्छात्रा प्रियङ्का शर्मा अभिनयेन सर्वान् अतिशयाना सकलसहृदयश्लाघनीयतां प्राप्नोत्।

वेदव्यासपरिसरच्छात्रैः अभिनीतं तृतीयं 'कुहनाभैक्षवं' नाम प्रहसनम्।

अन्तिमं प्रहसनं च आसीत् शृङ्गेरीस्थस्य श्रीराजीवगान्धिपरिसरस्य छात्रैः अभिनीतं 'भगवदज्जुकीयम्'। प्रहसनस्य अस्य प्रस्ततीकरणे छात्रैः भूयान् एव परिश्रमः कृतः, महान् पूर्वाभ्यासः कृतः इति च अनुभूयते स्म। अभिनयेऽपि छात्रैः महती दक्षता प्रदर्शिता। परिव्राजकस्य प्राणाः यदा यमदूतेन सम्भ्रमवशात् अज्जुकायाः वसन्तसेनायाः शरीरे संयोजिताः तदा परिव्राजकस्य कथनशैलीं हावभावादिकं च यथावत् अनुसरन्ती वसन्तसेना सहृदयेषु महान्तं विनोदम् अजनयत्। शिष्यस्य शाण्डिल्यस्य अभिनयः अपि न न्यूनः आसीत्। परिव्राजकस्य भूमिकां निर्वहता मञ्जुनाथभट्टेन, वसन्तसेनायाः भूमिकां निर्वहन्त्या अहल्या भट्ट-इत्यनया, शाण्डिल्यस्य भूमिकां निर्वहता नवनीतकृष्णेन च स्वीयेन उत्कृष्टेन अभिनयेन सहृदयाः नितरां सन्तोषिताः।





प्रायः सर्वाणि अपि प्रहसनानि छात्रैः तथा प्रस्तुतानि यत् तेषु उत्कृष्टतानिर्धारणे तारतम्यनिश्चये च निर्णायकाः भूयांसमेव क्लेशम् अन्वभवन् यद्यपि सः क्लेशः एव, तथापि तं क्लेशम् अनुभवन्तः अपि निर्णायकाः संस्कृतरङ्गभूम्याः ईदृशम् अभिवर्धनं दृष्ट्वा नितरां सन्तुष्टाः अभवन्। देशस्य अन्यान्यभाषीयासु रङ्गभूमिषु अधुना यादृशी प्रगतिः दृश्यते तादृशी एव प्रगतिः संस्कृतरङ्गभूम्याम् अपि दृश्यते इत्येतत् अनेन नाट्यमहोत्सवेन सम्यक् प्रमाणितम् अभवत्।



संस्थानेन प्रतिवर्षम् एषा अन्तःपरिसरीयसंस्कृतनाट्यस्पर्धा आयोज्यते एव। तत्र अभिनेतुं रूपकाणि अपेक्षितानि भवन्ति एव। यद्यपि प्राचीनानां रूपकाणाम् अभिनयः शोभनः एव, तथापि इमां स्पर्धां निमित्तीकृत्यैव आधुनिकानामपि रूपकाणां विरचने कविभिः कुतः प्रयत्नः न करणीयः? परिसरप्राध्यापकाः, अन्ये ये केऽपि कवयः वा कुतः तद्विषये प्रयत्नं न कुर्युः?- इति कश्चन विचारः नाट्यमहोत्सवस्य अस्य दर्शनेन अस्फुरत्। अग्रिमेषु वर्षेषु एतेन व्याजेन विनूतनानि अपि रूपकाणि सृष्टानि भवन्तु, येन संस्कृतरूपकवाङ्मयमपि वृद्धिम् आप्नोतु इति आशास्यते।

## IMPORTANT COMMENTS

The festival was a theater lover's delight in all departments of theater - acting, music, lights, stage setting, costumes etc. It also proves that given more institutional and financial support, Sanskrit theater can really take off to new heights. It is suggested that the Sansthan should sponsor shows of good plays in various cities.

One comment on the results. While it may be a good idea to encourage everyone, the Sansthan erred in trying to be equal to everyone and in not giving that extra recognition that is legitimately due to any special performance. Merit in performing arts cannot be sacrificed at the altar of egalitarianism. It may be outside the domain of this commentator to comment on the overall result but that it left many dissatisfied can be said without saying much.

**(Ashutosh Dayal Mathur)**
St. Stephens College, University of Delhi

Head office of Rashtriya Sanskrit Sansthan is constantly working for the promotion of classical arts, especially the Sanskrit theatre. Proof of this was this festival organized in February, 2016, which is thirteenth in the sequence. This effort is creditable for bringing different campuses of various states of India on one stage, because only through this they can exchange their ideas about performance and learning. These plays were not performed by professional or trained artists, but were presented by traditional Sanskrit students. Keeping this in mind, it can be said undoubtedly that this *Natyotsava* was most successful in bringing Sanskrit theatre live on Delhi stage with its proper form and colour. A number of students, teachers and scholars as audience enjoyed these plays with full fun all the time, as is rightly said **Natyam bhinnarucher janasya bahudhapyekam samaradhanam**.

**(Shashi Tiwari)**
Presidential Awardee

# राष्ट्रियसंस्कृतसंस्थानस्य रङ्गयात्रा

**प्रथमः वसन्तोत्सवः ( 3-4 मार्च, 2004 ) स्थानम्- डॉ. अम्बेडकरप्रेक्षागृहम्, आन्ध्रभवनम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 1. भगवदज्जुकीयम्, गुरुवायूरपरिसरः, 2. सभिकद्यूतकरम्, भोपालपरिसरः, 3. जागरूको भव, लखनऊपरिसरः 4. कर्णभारम्, श्रीराजीवगान्धीपरिसरः, 5. संस्कृतोद्गारम्, रणवीरपरिसरः, 6. मुद्राराक्षसम्, गरलीपरिसरः, 7. अभिज्ञानशाकुन्तलम्, जयपुरपरिसरः, 8. मदनदहनम्, सदाशिवपरिसरः।

**द्वितीयः वसन्तोत्सवः ( 1-2 मार्च, 2005 ) स्थानम्- डॉ. कमानीप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 9. कर्णाश्वत्थामीयम्, जयपुरपरिसरः, 10. चारुदत्तम्, श्रीराजीवगान्धीपरिसरः, 11. चम्पकरामः, गुरुवायूरपरिसरः, 12. राष्ट्रं नः प्राणाः, रणवीरपरिसरः, 13. उरुभङ्गम्, गरलीपरिसरः, 14. दूतवाक्यम्, लखनऊपरिसरः, 15. यमराजकीयम्, के.जे. सोमैय्याविद्यापीठम्, 16. कृतककौमुदम्, भोपालपरिसरः।

**तृतीयः वसन्तोत्सवः ( 23-24 फरवरी, 2006 ) स्थानम्- डॉ. कमानीप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 17. अश्वत्थामा, मुख्यालयः, 18. नागानन्दम्, गुरुवायूरपरिसरः, 19. मध्यमव्यायोगः, लखनऊपरिसरः, 20. मत्तविलासप्रहसनम्, भोपालपरिसरः, 21. दूतघटोत्कचम्, गरलीपरिसरः, 22. अबलासामर्थ्यम्, गङ्गानाथझापरिसरः, 23. मृच्छकटिकम्, श्रीराजीवगान्धीपरिसरः, 24. स्नुषाविजयम्, जयपुरपरिसरः, 25. देहि पादपल्लवमुदारम्, सदाशिवपरिसरः, 26. भूकैलाशम्, के.जे. सोमैय्याविद्यापीठम्, 27. सुभद्राहरणम्, रणवीरपरिसरः।

**चतुर्थः वसन्तोत्सवः ( 20-22 फरवरी, 2007 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 28. दुर्योधनम्, मुख्यालयः, 29. स्वप्नवासवदत्तम्, गुरुवायूरपरिसरः, 30. हास्यचूडामणिः, लखनऊपरिसरः, 31. प्रतिज्ञाश्वत्थामीयम्, भोपालपरिसरः, 32. राजवैभवम्, सदाशिवपरिसरः, 33. प्रसन्नराघवम्, श्रीराजीवगान्धीपरिसरः, 34. पञ्चरात्रम्, गरलीपरिसरः, 35. बालभारतम्, जयपुरपरिसरः, 36. चाणक्यविजयम्, रणवीरपरिसरः, 37. रघुदासस्य पत्रम्, गंगानाथझापरिसरः, 38. विक्रमोर्वशीयम्, के.जे. सोमैय्याविद्यापीठम्।

**पञ्चमः कौमुदीमहोत्सवः ( 28-30 नवम्बर, 2007 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 39. कौरवौरवम्, मुख्यालयः, 40. अभिषेकनाटकम्, श्रीराजीवगान्धीपरिसरः, 41. मालविकाग्निमित्रम्, गुरुवायूरपरिसरः, 42. त्रिपुरदाहः, भोपालपरिसरः, 43. लटकमेलकम्, जयपुरपरिसरः, 44. भर्तृहरिनिर्वेदम्, सदाशिवपरिसरः, 45. चण्डकौशिकम्, लखनऊपरिसरः, 46. कर्पूरमञ्जरी, गरलीपरिसरः, 47. धूर्तसमागमः, गङ्गानाथझापरिसरः, 48. अविमारकम्, रणवीरपरिसरः, 49. मदनकेतुचरितम्, के.जे. सोमैय्याविद्यापीठम्, 50. यक्षगानम्-सुधन्वमोक्षः, श्रीराजीवगान्धीपरिसरः।

**षष्ठः कौमुदीमहोत्सवः ( 24-26 नवम्बर, 2008 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 51. यक्षगानम्, मुख्यालयः, 52. पञ्चकल्याणी, गुरुवायूरपरिसरः, 53. आश्चर्यचूडामणिः, श्रीराजीवगान्धीपरिसरः, 54. सीताच्छायम्, भोपालपरिसरः, 55. सावित्रीचरितम्, रणवीरपरिसरः, 56. प्रतिज्ञायौगन्धरायणम्, जयपुरपरिसरः, 57. रत्नावली, गरलीपरिसरः, 58. गौरीदिगम्बरप्रहसनम्, गङ्गानाथझापरिसरः, 59. विवाहविडम्बनम्, लखनऊपरिसरः, 60. उत्तररामचरितम्, सदाशिवपरिसरः, 61. राष्ट्रं रक्षति रक्षितम्, के.जे. सोमैय्याविद्यापीठम्, 62. मालविकाग्निमित्रम्, कालिदास संस्कृत अकादमी, उज्जैन (आमन्त्रितप्रस्तुतिः), 63. भगवदज्जुकीयम्, नीपारङ्गमण्डली, लखनऊ (आमन्त्रितप्रस्तुतिः)।

**सप्तमः कौमुदीमहोत्सवः ( 10-12 नवम्बर, 2009 ) स्थानम्- प्यारेलालप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि नाट्यानि : 64. रासलीला, श्रीराधामाधवसंस्कृतमहाविद्यालयः, मणिपुरम् (आमन्त्रितप्रस्तुतिः), 65. अभिज्ञानशाकुन्तलम् (प्रथमाङ्कः), भोपालपरिसरः 66. प्रतिमानाटकम्, सदाशिवपरिसरः, 67. अभिज्ञानशाकुन्तलम् (द्वितीयाङ्कः), रणवीरपरिसरः, 68. अभिज्ञानशाकुन्तलम् (तृतीयाङ्कः), गरलीपरिसरः, 69. अभिज्ञानशाकुन्तलम् (चतुर्थाङ्कः), श्रीराजीवगान्धीपरिसरः, 70. इन्द्रजालम्, गङ्गानाथझापरिसरः, 71. विक्रमोर्वशीयम्, नाट्यपरिषद्, सागरम् (आमन्त्रितप्रस्तुतिः), 72. अभिज्ञानशाकुन्तलम् (पञ्चमाङ्कः), लखनऊपरिसरः, 73. अभिज्ञानशाकुन्तलम् (षष्ठाङ्कः), गुरुवायूरपरिसरः, 74. अभिज्ञान-शाकुन्तलम् (सप्तमाङ्कः), जयपुरपरिसरः, 75. कुन्दमाला, कमलवशिष्ठस्य आमन्त्रिता प्रस्तुतिः।

## अष्टमः कौमुदीमहोत्सवः ( 25-27 अक्टूबर, 2010 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।

प्रस्तुतानि नाट्यानि : 76. कर्णभारम्, गुरुवायूरपरिसरः, 77. मध्यमव्यायोगः, जयपुरपरिसरः 78. पञ्चरात्रम्, के.जे. सोमैय्याविद्यापीठम्, 79. प्रतिज्ञायौगन्धरायणम्, भोपालपरिसरः, 80. दूतवाक्यम्, गङ्गानाथझापरिसरः, 81. दरिद्रचारुदत्तम्, गरलीपरिसरः, 82. स्वप्नवासवदत्तम्, श्रीराजीवगान्धीपरिसरः, 83. बालचरितम्, श्रीसदाशिवपरिसरः, 84. अविमारकम्, लखनऊपरिसरः, 85. प्रतिमानाटकम्, श्रीरणवीरपरिसरः।

## नवमः कौमुदीमहोत्सवः ( 30 जनवरी, 2012 तः 01 फरवरी, 2012 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।

प्रस्तुतानि नाट्यानि : 86. उत्तररामचरितम्, श्रीसदाशिवपरिसरः, 87. प्रशान्तराघवम्, गङ्गानाथझापरिसरः, 88. कुन्दमाला, जयपुरपरिसरः, 89. प्रसन्नराघवम्, भोपालपरिसरः, 90. बालरामायणम्, श्रीरणवीरपरिसरः, 91. अभिषेकनाटकम्, के.जे. सोमैय्याविद्यापीठम्, 92. सीताराघवम्, श्रीराजीवगान्धीपरिसरः, 93. प्रतिमानाटकम्, श्रीवेदव्यासपरिसरः, 94. महावीरचरितम्, लखनऊपरिसरः, 95. आश्चर्यचूडामणिः, गुरुवायूरपरिसरः।

## दशमः नाट्यमहोत्सवः ( 05-07 फरवरी, 2013 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।

प्रस्तुतानि नाट्यानि : 96. मुद्रितकुमुदचन्द्रम्, गङ्गानाथझापरिसरः, 97. मल्लिकामकरन्दम्, श्रीसदाशिवपरिसरः, 98. मृच्छकटिकम् (1-2 अङ्कौ), श्रीराजीवगान्धीपरिसरः, 99. मृच्छकटिकम् (3-5 अङ्काः), गुरुवायूरपरिसरः, 100. मृच्छकटिकम् (6-7 अङ्कौ), श्रीवेदव्यासपरिसरः, 101. मृच्छकटिकम् (8 अङ्कः), श्रीरणवीरपरिसरः, 102. मृच्छकटिकम् (9-10 अङ्कौ), लखनऊपरिसरः, 103. मालतीमाधवम्, जयपुरपरिसरः, 104. कौमुदीमित्रानन्दप्रकरणम्, के.जे. सोमैय्याविद्यापीठम्, 105. प्रबुद्धरौहिणेयम्, भोपालपरिसरः।

## एकादशः नाट्यमहोत्सवः ( 01-03 फरवरी, 2014 ) स्थानम्- हिन्दूमहाविद्यालयप्रेक्षागृहम्, नवदेहली।

प्रस्तुतानि नाट्यानि : 106. प्रमद्वरा, गङ्गानाथझापरिसरः, 107. चन्द्रकला, श्रीसदाशिवपरिसरः, 108. वृषभानुजा, भोपालपरिसरः, 109. मृगाङ्कलेखा, के.जे. सोमैय्याविद्यापीठम्, 110. मणिमञ्जरी, श्रीरणवीरपरिसरः, 111. विद्योत्तमा, श्रीवेदव्यासपरिसरः, 112. अनारकली, एकलव्यपरिसरः, 113. कर्पूरमञ्जरी, श्रीराजीवगान्धीपरिसरः, 114. प्रियदर्शिका, लखनऊपरिसरः, 115. रत्नावली, जयपुरपरिसरः, 116. शृङ्गारमञ्जरी, गुरुवायूरपरिसरः।

## द्वादशः नाट्यमहोत्सवः ( 04-06 फरवरी, 2015 ) स्थानम्- शङ्करहॉलकन्सर्टप्रेक्षागृहम्, दिल्लीविश्वविद्यालयः, नवदेहली।

प्रस्तुतानि नाट्यानि : 117. मुद्राराक्षसम् (1-3 अङ्काः), गङ्गानाथझापरिसरः, 118. मुद्राराक्षसम् (4-7 अङ्काः), गुरुवायूरपरिसरः, 119. बालभारतम्, श्रीराजीवगान्धीपरिसरः, 120. मालतीमाधवम् (1-3 अङ्काः), लखनऊपरिसरः, 121. मालतीमाधवम् (4-7 अङ्काः), भोपालपरिसरः, 122. मालतीमाधवम् (8-10 अङ्काः), के.जे. सोमैय्या विद्यापीठम्, 123. बालरामायणम् (1-3 अङ्काः), श्रीवेदव्यासपरिसरः, 124. बालरामायणम् (4-7 अङ्काः), श्रीरणवीरपरिसरः, 125. बालरामायणम् (8-10 अङ्काः), जयपुरपरिसरः, 126. महावीरचरितम् (1-4 अङ्काः), श्रीसदाशिवपरिसरः, 127. महावीरचरितम् (5-7 अङ्काः), एकलव्यपरिसरः।

## त्रयोदशः नाट्यमहोत्सवः ( 24-26 फरवरी, 2016 ) स्थानम्- डॉ. सर्वेपल्ली- राधाकृष्णन्प्रेक्षागृहम्, केन्द्रीयविद्यालयः ( 03 ), दिल्लीकेंट, नवदेहली।

प्रस्तुतानि नाट्यानि : 128. लटकमेलकम्, श्रीरणवीरपरिसरः, 129. वञ्चकपञ्चकम्, एकलव्यपरिसरः, 130. कुहनाभैक्षवम्, श्रीवेदव्यासपरिसरः, 131. मृदङ्गदासप्रहसनम्, श्रीगङ्गानाथझापरिसरः, 132. स्नुषाविजयम्, लखनऊपरिसरः, 133. हास्यार्णवप्रहसनम्, श्रीसदाशिवपरिसरः, 134. पलाण्डुमण्डनम्, जयपुरपरिसरः, 135. मत्तविलासः, गुरुवायूरपरिसरः, 136. विवाहविडम्बनम्, के.जे. सोमैय्या विद्यापीठम्, 137. हास्यचूडामणिः, भोपालपरिसरः, 138. भगवदज्जुकीयम्, श्रीराजीवगान्धीपरिसरः।

—सम्पादकः


# त्रयोदशसंस्कृतनाट्यमहोत्सवस्य कानिचिद् दृश्यानि






















# राष्ट्रिय-संस्कृत-संस्थानम्

(राष्ट्रिय-मूल्यांकन-प्रत्यायन-परिषद् द्वारा 'ए' श्रेणी से प्रत्यायित
भारत शासन के मानव संसाधन विकास मन्त्रालय के अधीन मानित विश्वविद्यालय)

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाष : 011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in   website : www.sanskrit.nic.in